दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-255 | 1 | जुलाई 07, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढकृष्णसप्तमी
आषाढः 22 प्रविष्टांशः मङ्गलमयः भवेत्

2 इण्डोनेशियादेशः गुरुदेव-रवीन्द्रनाथ-ठाकुरस्य ऐतिहासिकयात्रायाः

3 विदेशराज्यमन्त्री कीर्तिवर्धनसिंहः संयुक्तराष्ट्रसङ्घस्य एआई-प्रशासने (AI Governance) वैश्विकसंवादे भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं करिष्यति

4 उत्तराखण्डस्य मुख्यमन्त्री पुष्करसिंहधामी कैलाशमानसरोवरयात्रा-२०२६ इत्यस्य प्रथमदलं हरितपताकां प्रदर्श्य प्रस्थानम् अकारयत्

## प्रधानमन्त्री नरेन्द्र मोदी स्वस्य त्रिदेशीय-हिन्द-प्रशान्त-प्रवासस्य प्रथमे चरणे इण्डोनेशिया-देशस्य जकार्तायां सम्प्राप्तवान्



*हिमसंस्कृतवार्ता।* प्रधानमन्त्री नरेन्द्र मोदी स्वस्य त्रिदेशीय-हिन्द-प्रशान्त-प्रवासस्य प्रथमे चरणे इण्डोनेशिया-देशस्य राजधान्यां जकार्तायां सम्प्राप्तवान्। जकार्ता-विमानपत्तने इण्डोनेशिया-देशस्य राष्ट्रपतिना प्रबोवो-सुबियान्तो इत्यमुना स्वयमुपस्थाय प्रधानमन्त्रिणः भव्यं स्वागतं विहतम्। तत्र स्थानीय-समुदायेन प्रवासी भारतीयैश्च पारम्परिक-सांस्कृतिक प्रस्तुतिभिः सह तस्य उत्साहपूर्ण अभिनन्दं कृतम्। अष्टादशाधिक-द्विसहस्रतमवर्षात् द्विपक्षीय-सम्बन्धानां व्यापक-रणनीतिक-सहयोग-स्तरस्य प्राप्तेः परं प्रधानमन्त्रिणः इयं प्रथमा द्विपक्षीय-यात्रा अस्ति। प्रवासेऽसौ राष्ट्रपतिना प्रबोवो इत्यमुना साकं द्विपक्षीय वार्ता विधाय सम्बन्धानां समीक्षां विधास्यति, सहैव सांस्कृतिक-नगरे योग्याकर्ता-स्थितं ऐतिहासिकं प्रम्बानन मन्दिर-परिसरमपि द्रक्ष्यति, यत्र भारत-इण्डोनेशिया-देशौ मिलित्वा संरक्षण-कार्यं करिष्यतः। अत्रावसरे प्रधानमन्त्री जकार्ता-नगरे प्रवासी भारतीयानां समूहमपि सम्बोधयेत्। प्रस्थानात् पूर्वं प्रदत्ते स्वकीय-वक्तव्ये तेन निगदितं यत्, प्रवासोऽयं भारतस्य ऐक्ट ईस्ट-नीतेः, महासागरीय-दृष्टिकोणस्य सहैव मुक्त-हिन्द-प्रशान्त क्षेत्रस्य च लक्ष्य सुदृढीकरिष्यति। यात्रायाः द्वितीये चरणे, अष्ट-दिनाङ्कात् दश-दिनाङ्क यावत्, प्रधानमन्त्री ऑस्ट्रेलिया-देशस्य प्रधानमन्त्रिणः एन्थनी-अल्बनीज इत्यस्य निमन्त्रणं स्वीकृत्य मेलबर्न-नगरं गमिष्यति। यत्र सः रक्षा-सुरक्षा-व्यापार-निवेश-उच्चप्रविधि-क्षेत्रेषु विस्तृतचर्चा विधास्यति। सहैव तृतीय-भारत-ऑस्ट्रेलिया-वार्षिक-शिखर सम्मेलने भागं भजिष्यति। अन्तिमे चरणे, जुलाई-मासस्य दश-एकादश दिनाङ्कयोः, सः न्यूजीलैण्ड-देशस्य प्रधानमन्त्रिणः क्रिस्टोफर लक्सन इत्यस्य आह्वानेन ऑकलैण्ड-नगरं प्राप्स्यति। विगत-चत्त्वारिंशत्- वर्षेषु कस्यचित् भारतीय-प्रधानमन्त्रिणः इयं प्रथमा न्यूजीलैण्ड-यात्रा वर्तते, यत्र आर्थिक-व्यापारिक सहयोगं वर्धयितुं मन्त्रणा भविष्यति ।

## प्रधानमन्त्रिणा दलाई लामा-वर्यं तस्य एकनवतितमे जन्मदिने शुभाशयाः प्रेषिताः

प्रधानमन्त्रिणा नरेन्द्रमोदिना आध्यात्मिक-गुरुं परमं पवित्रं दलाई लामा-वर्यं तस्य एकनवतितमे जन्मदिने शुभाशयाः प्रेषिताः। सामाजिकान्तर्जालीये पटले लिखिते सन्देशे श्रीमोदी अवदत् यत्, तस्य शान्तेः सौहार्दस्य च सन्देशः सम्पूर्ण विश्वस्मिन् जनानां कृते मार्गदर्शकशक्तित्वेन विद्यते। प्रधानमन्त्री अवदत् यत्, दलाई लामा वर्यस्य नैतिकं आध्यात्मिकं च जीवनम्, वैश्विक-कल्याणार्थं तस्य प्रतिबद्धतां प्रदर्शयति । अत्रावसरे सः दलाई लामा वर्यस्य दीर्घं स्वस्थं च जीवनं प्रार्थयत्।

## सुभाषितम्

**तृणानि नोन्मूलयति प्रभञ्जनो,**
**मृदूनि नीचैः प्रणतानि सर्वतः।**
**स्वभाव एवोन्नतचेतसामयं,**
**महान्महत्स्वेव करोति विक्रमः॥**

अर्थात्- जिस प्रकार से प्रचण्ड आंधी बड़े बड़े वृक्षों को जड़ से उखाड़ देता है किन्तु छोटे से तृण को नहीं उखाड़ता, उसी प्रकार पराक्रमीजन अपने बराबरी के लोगों पर ही पराक्रम प्रदर्शित करते हैं और निर्बलों पर दया करते हैं।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## भगवतः जगन्नाथस्य रथयात्रायाः अवसरे त्रिशताधिकानि विशेष रेलयानानि प्रचालयिष्यन्ते इति रेलमन्त्री अश्विनी वैष्णवः प्रावोचत्



**हिमसंस्कृतवार्ता।** रेलमन्त्री अश्विनी-वैष्णवः प्रावोचत् यत् अस्मिन् वर्षे भगवतः जगन्नाथस्य रथयात्रायाः अवसरे त्रिशताधिकानि विशेष-रेलयानानि प्रचालयिष्यन्ते। एतानि यानानि नियमितरूपेण प्रचलयः अष्टशताधिकेभ्यः रेलयानेभ्यः अतिरिच्य भविष्यन्ति, येन यात्रिणां गतागतं सौकर्यमयं स्यात्। नवदिल्ल्यां संवाददातृभिः सह सम्भाषमाणः श्रीवैष्णवः प्रोदीरितवान् यत्, रथयात्रायाः सुचारु-सञ्चालनं सुरक्षित-प्रबन्धनं च सुनिश्चेतुं सः अद्यैव रेल-विभागीय-सिद्धतायाः उच्चस्तरीयां समीक्षां विधास्यति।

## केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः अवदत् यत् सहकार-आन्दोलनम्, परिष्कार-अङ्गीकरण-व्यावसायिकप्रबन्धनानां माध्यमेन विस्तारस्य नूतने चरणे प्रविशति।



केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः अवदत् यत् सहकार-आन्दोलनम्, परिष्कारस्य, अङ्गीकरणस्य, व्यावसायिकप्रबन्धनस्य च माध्यमेन विस्तारस्य नूतने चरणे प्रविशति । सहकारिता-मन्त्रालयस्य पञ्चमं संस्थापना-समारोहं सम्बोधयन् श्रीशाहः अवदत् यत् प्रत्येकस्मिन् क्षेत्रे पञ्चसु उत्तम प्रदर्शन-सहकार-संस्थानां परिचयं कर्तुं श्रेणी-संरचना घोषिता अस्ति।गृहमन्त्री श्रीशाहः सहकारिता मन्त्रालयस्य प्रशंसाम् अकरोत् यत् विगतपञ्चवर्षाणि यावत् सहकारस्य माध्यमेन समृद्धेः मन्त्रस्य अनुसरणं कृत्वा कोटिशः जनानां जीवनं परिवर्तितम् अस्ति।

## निर्वाचनायोगेन पश्चिम बङ्गाल राज्यस्य राज्यसभायाः त्रिषु आसनेषु उप-निर्वाचनस्य घोषणा कृता

निर्वाचनायोगेन पश्चिम बङ्गाल राज्यस्य राज्यसभायाः त्रिषु आसनेषु उप-निर्वाचनस्य घोषणा कृता अस्ति। राज्यसभायाः सदस्यानां सुखेन्दु शेखर् रे, सुष्मिता देवः, प्रकाश् चिक् बड़ाईकः इत्येतेषां त्यागपत्रस्यानन्तरं स्थानानि रिक्तानि आसन्। निर्वाचनस्य सञ्ज्ञेतना श्वः प्रकाशिता भविष्यति, नामाङ्कनस्य अन्तिमा तिथिः जुलाई-मासस्य चतुर्दश-दिनांकं यावत् अस्ति। जुलाई-मासस्य पञ्चदश-दिनाङ्के नामाङ्कनानां परीक्षणं भविष्यति। एतेषां आसनानां कृते जुलाईमासस्य चतुर्विंशति-दिनाङ्के मतदानं भविष्यति, तस्मिन् एव दिने मतानां गणनाऽपि भविष्यति।

## सर्बिया-देशस्य नोवाक्-जोकोविच इत्यसौ रूस-देशस्य रोमन-सफिउलिन् इत्येतं पराजित्य पुरुष एकल-स्पर्धायाः प्रागुपान्त्य-चक्रीय-क्रीडायां प्रविष्टवान्



विम्बल्डन्-टेनिस्-क्रीडायां, सर्बिया-देशस्य नोवाक्-जोकोविच इत्यसौ रूस-देशस्य रोमन-सफिउलिन् इत्येतं पराजित्य पुरुष एकल-स्पर्धायाः प्रागुपान्त्य-चक्रीय-क्रीडायां प्रविष्टवान्। अग्रिमायां प्रागुपान्त्यचक्रीय-क्रीडायां जोकोविच् इत्येषः फ़ेलिक्स् आगर-अलियासिमे इत्यनेन, एलेजाण्ड्रो डेविडोविच फ़ोकिना इत्यनेन वा सम्मुखीभूयात्।

# आर.सी.एस. उड्डयनयोजना- कुल्लू- मण्डी- चण्डीगढ़नगराणां कृते हेलिकॉप्टर-सेवा आरब्धा



हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खु महोदयेन सोमवासरे स्वकीयात् आधिकारिक-आवासात् 'ओकओवर' इत्यस्मात् मण्डी-चण्डीगढ़, कुल्लू- मण्डी- चण्डीगढ़नगराणां मध्ये प्रतिदिनं चलन्तीनां हेलिकॉप्टर-सेवानां आभासीय (वर्चुअल) माध्यमैन शुभारम्भः कृतः। भारतसर्वकारस्य 'क्षेत्रीय- सम्पर्क- योजना' इत्यस्याः अन्तर्गतं मण्डी- चण्डीगढ़- हेलिकॉप्टरसेवा प्रचालयिष्यते, यत्रैव आर. सी. एस. रहित (आपण-आधारित) प्रतिरूपानुसारं (मॉडल) कुल्लू- मण्डी- चण्डीगढ़नगराणां कृते 'हेरिटेज एविएशन प्राइवेट लिमिटेड' इत्यनया संस्थया अस्याः सेवायाः सञ्चालनं विधास्यते।

### कुल्लू-मण्डी-चण्डीगढ़नगराणां कृते समयसारणी

कुल्लू-नगरतः हेलिकॉप्टर-यानस्य उड्डयनं प्रातः ९:०० वादने भविष्यति तथा च ९:१० वादने मण्डीं प्राप्स्यति। एतस्मात् परं मण्डीतः ९:१५ वादने प्रस्थाय हेलिकॉप्टरयानं ९:४५ वादने चण्डीगढ़ं प्राप्स्यति। प्रत्यागमनस्य उड्डयनं चण्डीगढ़तः प्रातः १०:०० वादने भविष्यति, १०:३० वादने मण्डीं प्राप्स्यति, मण्डीतः च १०:३५ वादने प्रस्थाय प्रातः १०:४५ वादने कुल्लू-नगरं सम्प्राप्स्यति।

एताः सेवाः नवनिर्मितात् काङ्गनीधार (मण्डी) हेलीपोर्ट-स्थानतः सञ्चालयिष्यन्ते। आर.सी.एस. उड्डयनयोजनायाः अन्तर्गतं मण्डी- चण्डीगढ़-क्षेत्राय भाटकं ३,५०० रूप्यकाणि निश्चितं कृतम् अस्ति, यत्रैव कुल्लू-मण्डी-चण्डीगढ़क्षेत्राय भाटकं ८,५०० रूप्यकाणि निर्धारितं वर्तते। आधुनिक-यात्रि-सुविधाभिः आवश्यक- अवसंरचनाभिः च सुसज्जितं काङ्गनीधार-हेलीपोर्ट वायुसेवानां महत्त्वपूर्णकेन्द्ररूपेण स्थापितं भविष्यति।

### पर्यटनस्य आपातकालीनसेवानां च सुदृढीकरणं भविष्यति- मुख्यमन्त्री

मण्डी-कुल्लू-मण्डलयोः जनेभ्यः हेलिकॉप्टर-सेवानां शुभारम्भे शुभकामनाः प्रदाय मुख्यमन्त्रिणा कथितं यत् राज्यसर्वकारः प्रदेशस्य दूरवर्तिषु पर्वतीयक्षेत्रेषु च वायुसम्पर्कं सुदृढीकर्तुं निरन्तरं प्रयासरतः अस्ति। तेन प्रोक्तं यत् आसां हेलिकॉप्टर-सेवानां प्रारम्भेण सह वायुसम्पर्कक्षेत्रे एका अन्या महती सिद्धिः प्राप्ता अस्ति। एताभिः सेवाभिः यात्रासमये श्लाघनीया न्यूनता आगमिष्यति, पर्यटनं प्रोत्साहनं प्राप्स्यति, आपातकालीनसेवानां क्षमता दृढ़ा भविष्यति, स्थानीयवासिभ्यः पर्यटकेभ्यश्च श्रेष्ठाः सुविधाः प्राप्स्यन्ते।

मुख्यमन्त्रिणा प्रतिपादितं यत् राज्यसर्वकारः हेलीपोर्ट्- विकासस्य, क्षेत्रीय-वायुसम्पर्कस्य विस्तारस्य, भारतसर्वकारस्य अन्यहितधारकाणां च सहयोगेन आर.सी.एस.-उड्डयनयोजनायाः प्रभावी-क्रियान्वयनमाध्यमेन विमानन-अवसंरचनां (एविएशन इन्फ्रास्ट्रक्चर) भूयः सुदृढीकर्तुं कटिबद्धः अस्ति। पर्यटनवर्धनार्थं राज्यसर्वकारस्य प्रचेष्टाः रेखाङ्कितं कुर्वता मुख्यमन्त्रिणा कथितं यत् प्रत्येकस्मिन् मण्डलमख्यालये प्रमुखपर्यटनस्थलेषु च हेलीपोर्ट-निर्माणं विधीयते। तेन प्रोक्तं यत् हमीरपुरमण्डलस्य जसकोटक्षेत्रे, काङ्गड़ामण्डलस्य रक्कड़- पालमपुरयोः, चम्बामण्डलस्य च हेलीपोर्ट-निर्माणकार्यम् अन्तिमे चरणे वर्तते। एतेषां हेलीपोर्ट-स्थानानां निर्माणेन उच्चश्रेण्याः पर्यटकानाम् आगमनं हिमाचलप्रदेशे वर्धिष्यते, येन स्थानीयजनेभ्यः आयस्य जीविकायाश्च नूतनावसराः सृजिताः भविष्यन्ति। तेन कथितं यत् ऊनानगरे हेलीपोर्ट-निर्माणाय राज्यसर्वकारेण धनराशेः प्रावधानं कृतम् अस्ति, नाहन-सोलनयोः अपि हेलीपोर्ट-निर्माणाय विचारश्च प्रचलति। एतदतिरिच्य लाहौल-स्पीतिमण्डलस्य 'रङ्गरीक' क्षेत्रे सेनायाः सहयोगेन एकस्य हेलीपोर्ट-स्थलस्य निर्माणम् अपि विधीयते।

# रजनीपाटिलमहोदया अवदत्- सङ्घटनस्य जनानाम् उपेक्षाभावाः आसन्, मुख्यमन्त्रिणा मन्त्रिभिः च साकं वार्तालापः कारितः



हिमसंस्कृतवार्ताः — शिमला।

काङ्ग्रेसदलस्य प्रदेशप्रभारिणी रजनीपाटिलमहोदया कथितवती यत् सर्वकार-सङ्घटनयोः मध्ये समन्वयः अतीव आवश्यकः वर्तते। एतद् भूयः श्रेष्ठं कर्तुं प्रयासः विधीयते। तया प्रोक्तं यत् सद्यः एव सम्पन्नेषु उपवेशनेषु सङ्घटनस्य जनानां केचन उद्वेगाः (गिले-शिकवे) सम्मुखम् आगताः यत् सर्वकारे तेषां विचारः न मन्यते। एतादृशानां पदाधिकारिणां मुख्यमन्त्रिणा मन्त्रिभिः च सह वार्तालापः कारितः। सोमवासरे राजीवभवने शिमलायां आयोजितायां पत्रकारगोष्ठ्यां पाटिलमहोदया अवदत् यत् दलीयसङ्घटने कश्चित् उद्वेगः भवति एव। रजनीपाटिलमहोदया प्रतिपादितवती यत् निर्वाचिते कस्मिंश्चिदपि जनप्रतिनिधौ सङ्घटनस्य जनानां च महत्तरं दायित्वं भवति, अतः तैः अस्मिन् योग्यं भवितुं पूर्णः प्रयासः करणीयः। तया प्रोक्तं यत् राममन्दिरस्य धनचौर्यं तथा च नीट (NEET) परीक्षायाः प्रश्नपत्रगोपनभङ्गः (पेपर लीक) च बृहन्तौ विषयौ स्तः। काङ्ग्रेसदलं एतान् सर्वसामान्यानां मध्ये नेष्यति। तया कथितं यत् सुदीर्घकालात् सङ्घटनं भङ्गं चलति स्म।सर्वेषां पदाधिकारिणां दायित्वाना निश्चीयन्तेअधुना अस्य सङ्घटनात् परं सर्वेषां पदाधिकारिणां दायित्वानि निश्चीयन्ते। पाटिलमहोदया अवदत् यत् काङ्ग्रेसस्य सर्वेभ्यः मन्त्रिभ्यः प्रभारिरूपेण एकैकस्य मण्डलस्य (जिले का) प्रभारः प्रदास्यते, येन ते तेषु मण्डलेषु दलस्य कार्यकर्तृभिः साकं साक्षात् सम्भाषणं कुर्वन्तः सङ्घटनस्य कार्याणि प्रभावशालीनि विधास्यन्ति। सङ्घटने यस्मै यत् दायित्वं समर्पितम्, तस्मिन् तैः योग्यं भवितव्यम्, अन्यथा ते पदमुक्ताः करिष्यन्ते। दलस्य सर्वेषां पदाधिकारिणां, मण्डल-खण्ड-स्तरीयाणां च सर्वेषां कार्यं प्रति त्रिषु मासेषु पुनरीक्षणं (समीक्षा) करिष्यते।

### प्रदेशाध्यक्षः अवदत्, सङ्गठनं सर्वकारश्च मिलित्वा कार्यं कुरुतः

प्रभारिण्याः कथनात् परं काङ्ग्रेसप्रदेशाध्यक्षेण विनयकुमारेण ध्वनिप्रसारकयन्त्रं (माइक) हस्ते गृहीत्वा कथितं यत् सङ्घटने सर्वकाराय महती प्राथमिकता प्राप्यते। युवकाङ्ग्रेसाध्यक्षाय सर्वकारे अध्यक्षपदं, सेवादल-महिलाकाङ्ग्रेस-आदिभ्यः अपि प्राथमिकता दत्ता अस्ति। सङ्घटनं सर्वकारश्च मिलित्वा कार्यं कुरुतः स्तः। पत्रकारगोष्ठ्यां काङ्ग्रेसप्रदेशाध्यक्षं विनयकुमारं प्रति प्रभारिणी रजनीपाटिलमहोदया अवदत् यत् सा विधायकविषये अपि वदेत्। अस्मिन् पाटिलमहोदया तं निवारितवती— मया एतदपि कथितम्। इतः पूर्वं रजनीपाटिलमहोदया अवदत् यत् अग्रिमे १६ तथा १७ जुलाई दिनाङ्कयोः राजनैतिकविषयसमित्याः उपवेशने वेणुगोपालः आगच्छति। सः सर्वैः विधायकैः, मन्त्रिभिः, राजनैतिकपरामर्शसमित्या च सह मेलिष्यति।

# अग्रिमे वर्षे भवितव्येषु विधानसभाक्षेत्रनिर्वाचनेषु दलस्य विजयाय कार्यं करणीयम् - रजनीपाटिल

काङ्ग्रेसस्य प्रदेशप्रभारिण्या रजनीपाटिलमहोदया प्रदेशकाङ्ग्रेसमुख्यालये राजीवभवने मण्डलपरिषदः (जिला परिषद) पञ्चायतसमित्याः च सदस्यान्, शिमलाग्रामीणतः नगरनिगमशिमलायाः पार्षदान् च सम्बोधितवती। तया कथितं यत् अधुना तैः आगामीवर्षे भवितव्यासु विधानसभाक्षेत्रनिर्वाचनेषु दलस्य विजयाय कार्यं करणीयम्। पाटिलमहोदया अवदत् यत् कामं नगरनिगमं विहाय एतानि निर्वाचनानि दलीयचिह्नेन न संजातानि, परन्तु तेषां काङ्ग्रेसेन सह सम्बद्धता काङ्ग्रेसविचारधारायाः विजयः च एतत् सिद्धं करोति यत् प्रदेशस्य जनाः काङ्ग्रेससर्वकारस्य नीतिभिः निर्णयैः च साकं तिष्ठन्ति। प्रदेशकाङ्ग्रेसाध्यक्षेण विनयकुमारेण नवनिर्वाचितानां जनप्रतिनिधीनां स्वागतं कुर्वता भाजपायाः केन्द्रसर्वकारस्य ग्रामीणविरोधिनीनां नीतीनां परिचयः कारितः। अस्मिन् उपवेशने ए.आई.सी.सी. (AICC) सचिवः विदितचौधरी, चेतनचौहानः, यशवन्तछाजटा, विनोदजिण्टा, अमितनन्दा, विकासकालटा, नगर-अध्यक्षः इन्द्रजीतसिंहः, मण्डलपरिषद्-सदस्या आशाकंवर, प्रियङ्कातंवरः, अनुराधा, सुरेन्द्रमोगटा, अनीताशर्मा, सुरेन्द्ररेक्टा, उपमहापौरः उमाकौशलः, प्रधानः जितेन्द्रठाकुरः, बी.सी.डी. (BCD) अध्यक्षा कौशल्याशर्मा, जीतरामठाकुरः, उपाध्यक्षः भूपरामः, विक्रमवर्मा, प्रधना वनितावर्मा, मधुः, इन्दरः, पार्षदः सत्यवर्मा, हेमलता, प्रवीणगुप्ता, शमीमकटारिया, ममताचन्देलः, बी.सी.डी. सदस्यः लालसिंहः, विशालः, ललितः, चन्द्रप्रभानेगी, मोनिताचौहानः, पूनमचन्द्रिका, सञ्जयठाकुरः, सौरभचौहानः, अमितभरमौरी तथा च शिमलाग्रामीणस्य अन्ये बहवः जनप्रतिनिधयः उपस्थिताः आसन्।

# मोदीसर्वकारेण हिमाचलस्य विकासाय प्रदत्ता

## उड्डयनक्षमता, प्रदेशे प्रचलति 'सूटकेससर्वकारः' - सञ्जयटण्डनः



**हिमसंस्कृतवार्ताः- धर्मशाला**। भारतीयजनतापक्षस्य (भाजपा) प्रदेश- सह प्रभारिणा सञ्जयटण्डनेन सोमवारवासरे 'पण्डित दीनदयाल उपाध्याय प्रशिक्षण महाअभियान' इत्यस्य अन्तर्गतं पालमपुर- जालन्धर- धर्मशालामण्डलस्य प्रशिक्षणवर्गे मुख्यतिथिरूपेण भागः गृहीतः। अस्मिन् अवसरे भाजपा-प्रदेशोपाध्यक्षः हिमाचलप्रदेश- विधानसभायाः पूर्वतन् अध्यक्षः विपिनसिंहपरमारः विशेषरूपेण उपस्थितः आसीत्। स्वकीये सम्बोधने सञ्जयटण्डनेन कथितं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे केन्द्रसर्वकारेण हिमाचलप्रदेशस्य, विशेषतः काङ्गड़ा- संसदीयक्षेत्रस्य सर्वाङ्गीणविकासाय अभूतपूर्वः सहयोगः प्रदत्तः अस्ति। तेन प्रोक्तं यत् केन्द्रसर्वकारेण हिमाचलाय विकास- स्वास्थ्य- मार्ग- शिक्षा- आधारभूतसंरचनानां क्षेत्रेषु ऐतिहासिकाः उपहाराः दत्ताः, परन्तु वर्तमान- काङ्ग्रेससर्वकारः एतेषां संसाधनानां प्रभावी- उपयोगं कर्तुं पूर्णतया विफलः संजातः।

तेन प्रतिपादितं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे हिमाचलप्रदेशाय एम्स बिलासपुरं, मेडिकल डिवाइस पार्क, हाइड्रो इंजीनियरिंग कॉलेज, राष्ट्रियमार्गाणां विस्तारं समेताः सहस्रशः कोटिरूप्यकाणां विकासपरियोजनाः समर्पिताः सन्ति। यत्रैव सद्यः एव केन्द्रसर्वकारेण हिमाचलप्रदेशाय ३,९२० कोटिरूप्यकाणां केन्द्रीयसहायता अपि उपलब्धं कारिता। एतदतिरिच्य 'प्रधानमंत्री ग्राम सडक़ योजना' इत्यस्याः अन्तर्गतं वर्षे २०२५-२६ मध्ये प्रदेशाय २,२४७ कोटिरूप्यकाणां व्ययेन २९४ मार्गपरियोजनाः स्वीकृताः, यासु केन्द्रसर्वकारस्य प्रायः २,०१९ कोटिरूप्यकाणां योगदानं वर्तते। सञ्जयटण्डनेन कथितं यत् केन्द्रसर्वकारेण प्राकृतिकविपदाम् अवसरेष्वपि हिमाचलप्रदेशाय सर्वविधं साहाय्यं प्रदत्तम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना स्वयं प्रदेशस्य भ्रमणं कृत्वा साहाय्य- पुनर्वासकार्येभ्यः १,५०० कोटिरूप्यकाणां विशेष- साहाय्य- प्रदत्तस्य (पैकेज) घोषणा कृता तथा च राष्ट्रियमार्गाणां, प्रधानमंत्री आवासयोजनायाः, एसडीआरएफ (SDRF) इत्यस्य कृषकाणां च कृते अतिरिक्तसाहाय्यं प्रदातुं निर्णयः विहितः।तेन आरोपः कृतः यत् प्रदेशसर्वकारः केन्द्रात् प्राप्तायाः धनराशेः समुचितम् उपयोगं कर्तुं विफलः जातः, येन कारणेन विकासकार्याणि प्रभावितानि सन्ति। तेन उक्तं यत् काङ्ग्रेससर्वकारः केवलं घोषणासु प्रचारं यावत् एव सीमितः अस्ति, यत्रैव धरातले (भूमितले) जनतायै अपेक्षितः लाभः न प्राप्यते।सञ्जयटण्डनेन प्रतिपादितं यत् हिमाचलप्रदेशे भ्रष्टाचारः चरमे वर्तते अद्य च प्रदेशे एकः भ्रष्टः सर्वकारः प्रचलति, यं जनता 'सूटकेस-सर्वकारः' इति नाम्ना ज्ञातुम् आरब्धवती अस्ति। तेन कथितं यत् काङ्ग्रेसस्य एव नेतारः सार्वजनिकरूपेण अयम् आरोपं कुर्वन्ति यत् प्रदेशसर्वकारः प्रत्येकस्मिन् मासे पञ्च सूटकेस-पेटिकाः पूरयित्वा देहलीं प्रेषयति। यदा स्वयं काङ्ग्रेसस्य नेतारः स्वसर्वकारस्य उपरि एतादृशान् गम्भीरारोपान् उत्थापयन्ति, तदा प्रदेशस्य जनता अवगन्तुं शक्नोति यत् सर्वकारस्य कार्यप्रणाली कीदृशी वर्तते। तेन उक्तं यत् भारतीयजनतापक्षः कार्यकर्तृ- आधारितं सङ्घटनं वर्तते तथा च पण्डित-दीनदयालस्य 'अन्त्योदय' विचारं नीत्वा समाजस्य अन्तिमव्यक्तिं यावत् प्राप्तुं कटिबद्धः अस्ति। प्रशिक्षणवर्गाणाम् उद्देश्यं कार्यकर्तॄन् वैचारिकरूपेण सशक्तं विधातुं, सङ्घटनात्मकक्षमतायाः विकासं कर्तुं जनसेवायै च भूयः प्रभावीकरणं वर्तते। अस्मिन्नवसरे भाजपायाः अनेके वरिष्ठाधिकारिणः, जनप्रतिनिधयः, प्रशिक्षणवर्गस्य कार्यकर्तारश्च उपस्थिताः आसन्।

## वल्लभ- राजकीय- महाविद्यालय- ग्रन्थालये "ऋतुकाव्यम्" ग्रन्थसमर्पणम्



भूमौ भारतस्य देवतात्मास्वरूपे हिमाचलप्रदेशे मण्डीनगरे स्थितस्य वल्लभ- राजकीय- महाविद्यालयस्य ग्रन्थालयः अद्य संस्कृत- साहित्यसेवायाः शुभेन प्रसङ्गेन समलङ्कृत इव बभूव। भारतीयज्ञानपरम्परायाः संरक्षणसंवर्धनयोः पवित्रसङ्कल्पेन वैदिकगणसंस्थया प्रकाशितं तथा तस्याः संस्थापकाध्यक्षेन वत्सदेशराजशर्मणा सम्पादितं "ऋतुकाव्यम्" नामकं ग्रन्थरत्नं महाविद्यालयस्य ग्रन्थालयाय श्रद्धाभावपूर्वकं समर्पितम्। तस्मिन् प्रसङ्गे महाविद्यालयस्य पुस्तकालयाध्यक्षः श्रीचन्दनचौहानः सादरं ग्रन्थामुं प्रतिगृह्य प्रीतिमभ्यनन्दत्। अवोचच्च अयं ग्रन्थः केवलं काव्यसङ्ग्रह न, अपि तु भारतीय-साहित्य- परम्पराया रससम्पदः सजीवः प्रतिनिधिरिव। अस्मिन् ग्रन्थालयसंग्रहे समावेशेन विद्यार्थिनः, शोधार्थिनः, संस्कृतसाहित्यरसिकाश्च सम्यगध्ययनाय नूतनमाधारमवाप्स्यन्ति। सम्पादकेनापि मनसि निहितामाशां व्यक्तीकृत्य उक्तं यत्, यदा सत्साहित्यं विद्यापीठेषु प्रतिष्ठां लभते, तदैव तस्य वास्तविकं फलितं भवति। "ऋतुकाव्यम्" नामधेयायं ग्रन्थः अध्येतृणां हृदयेषु संस्कृतकाव्यस्य सौन्दर्यबोधं, भारतीयसंस्कृतेश्च गौरवबुद्धिं समुत्पादयिष्यतीति दृढा मम प्रत्याशा।अनन्तरं परस्परमैत्री-सौहार्दयोः साक्षी इव स्मृतिचिह्नरूपेण एकं छायाचित्रमपि गृहीतम्। एवं सत्साहित्यस्य समर्पणेन न केवलं ग्रन्थालयस्य संग्रहः समृद्धिमगमत्, अपि तु संस्कृतवाङ्मयस्य चिरन्तनी परम्परा पुनरपि नवोत्साहेन लोकहिताय प्रवहन्तीव प्रतीयते।

## हिमाचलप्रदेशे महत् प्रशासनिकपरिवर्तनम्, १८ आईएएस तथा १६ एचएएस अधिकारिणां स्थानान्तरणम्

**हिमसंस्कृतवार्ता शिमला।** हिमाचलप्रदेशे महत् प्रशासनिकपरिवर्तनं सञ्जातम्। राज्यसर्वकारेण १८ आईएएस (IAS) तथा १६ एचएएस (HAS) अधिकारिणां स्थानान्तरणं कृतम् अस्ति। स्थानान्तरितेषु आईएएस-अधिकारिषु डा. अभिषेक जैनः, सुदेश कुमार मोख्टा, अमरजीत सिंहः, तोरुल एस रवीशः, अभिषेक वर्मा, अजय कुमार यादवः, महेन्द्र पॉल गुर्जरः, विनय कुमारः, राहुल जैनः, दिव्यांशु सिंगलः, ओमकांत ठाकुरः, गुरुसिमर सिंहः, इंशांत जसवालः, रुपिंदर कौर, डा. राजदीप सिंहः, प्रियांशु खाटी, अंजलि गर्गः तथा चन्द्र प्रकाशः च सम्मिलिताः सन्ति। एवमेव एचएएस-अधिकारिषु अश्वनी कुमारः, एकता काप्टा, संजीव कुमारः, शिल्पी बेक्टा, सुरजीत सिंहः, हितेश आजादः, सिद्धार्थ आचार्यः, सन्नी शर्मा, नरेश कुमार वर्मा, चेत सिंहः, गौरव चौधरी, विश्रुत भारती, रमन कुमार शर्मा, पूजा अधिकारी तथा अमन कुमारः च सम्मिलिताः सन्ति। सर्वेभ्यः अधिकारिभ्यः नवीनानि स्थानानि पदनामानि च दत्तानि।

## भारत-ऋतु-विभागेन अद्य गुजरात्, कोङ्कण, गोवा, मध्यप्रदेश-महाराष्ट्र-छत्तीसगढ-प्रदेशेषु अति-वृष्ट्यै, रक्त-वर्षीया सञ्चेतना प्रसरिता



महाराष्ट्रस्य विशालः भागः प्रावृट्-वृष्ट्या निरन्तरं प्रभावितः अस्ति, यत्र मुम्बई-कोङ्कणप्रदेशयोः च व्यापकरूपेण जलप्लावनं, भूस्खलनं, भवनानां पतनं, मार्गेषु, रेल-विमानयानेषु च महती बाधा दृश्यते। सम्पूर्ण राज्ये आदिवसं यावत् प्रचण्डवृष्ट्याः अनुवर्तनेन अधिकारिणः सजगतायां तिष्ठन्ति । अधिकारिणः नागरिकान् अनावश्यकीं यात्रां परिहर्तुं प्रार्थयन्ति । मुख्यमन्त्री देवेन्द्र फड्नविसः एस्. डी. आर्. एफ्. इत्यस्य स्थितिं समीक्षितवान्, सर्वेभ्यः अधिकारिभ्यः शीघ्रं समन्वित-कार्याचरणाय निर्देशं च प्रदत्तवान्। प्रचण्डवृष्ट्या सम्पूर्ण कोङ्कणप्रदेशे बहूनि भूस्खलनानि अपि अभवन्, येन मुम्बई-गोवा-राष्ट्रिय राजमार्गे यातायातः प्रभावितः। अत्रान्तरे, भारत-ऋतु-विभागेन गुजरात्, कोङ्कण, गोवा, मध्यप्रदेश-महाराष्ट्र-छत्तीसगढ-प्रदेशेषु अत्यधिक-वृष्ट्या सह, केषुचित् स्थानेषु अत्यधिक-अति वृष्ट्यै, रेड्-अलर्ट् इति रक्त वर्षीया सञ्चेतना प्रसरिताऽस्ति। उत्तरी-अरब सागरस्य केषुचित् भागेषु, गुजरातराज्ये, हरियाणा-पञ्जाब्-राज्ययोः शेषभागेषु, राजस्थानस्य केषुचित् भागेषु च अग्रिमेषु त्रिषु दिनेषु नैर्ऋत्य-प्रावृट्चक्रस्य अग्रे गन्तुं परिस्थितिः अनुकूलास्ति इति विभगेनोक्तम्।

## फीफा विश्वकप क्रीडायां पुर्तगालदेशः स्पेनदेशं राउंड ऑफ 16 इत्यस्यां क्रीडायां सम्मुखीकरिष्यति



फीफा-विश्वकप-क्रीडायां पुर्तगालदेशः स्पेनदेशं राउंड ऑफ 16 इत्यस्यां क्रीडायां सम्मुखीकरिष्यति। मेक्सिको-नगरस्य एज़्टेका-क्रीडाङ्गणे मेक्सिको-देशस्य विरुद्धं नाटकीयतया त्रीणि-द्वे इत्यकैः विजयं प्राप्य इङ्ग्लेण्ड्-देशः फ़ीफ़ा-विश्वकप्-क्रीडायाः प्रागुपान्त्य-चक्रीय-द्वन्द्वे प्रविष्टवान्। अन्यस्यां स्पर्धायां, ब्राजील्-देशस्य क्रीडकः नेमार-जूनियर-इत्येषः अन्ताराष्ट्रिय-फुट्बाल्-क्रीडायाः निवृत्तेः घोषणाम् अकरोत्, तत्रैव गतरात्रौ फीफा-विश्वकप्-राउण्ड्-आफ्-16 चक्रे नार्वे-देशेन ब्राजील-देशः द्वे-एकम् इत्याङ्कैः पराजितम्।

# हिमाचल-मानसूनकालः - २४ घण्टाः सक्रिया भविष्यति आपदा-सहायता-दूरभाषसङ्ख्या, एकस्मिन् आह्वाने एव प्राप्स्यते साहाय्यम्, दिशानिर्देशाः प्रसारिताः



हिमसंस्कृतवार्ताः — शिमला ।हिमाचलप्रदेश-राज्य-आपदाप्रबन्धन-प्राधिकरणेन (HPSDMA) मानसून-ऋतवे विस्तृताः सुरक्षा-दिशानिर्देशाः प्रसारिताः। अस्य अन्तर्गतं प्रदेशस्य जनेभ्यः पर्यटकेभ्यश्च अधुना चतुर्विंशतिघण्टाः (२४ घण्टाः) साहाय्यम् उपलब्धं भविष्यति। राज्य-आपदा-सहायता-सङ्ख्या १०७० (1070) तथा च मण्डल-आपदा-सहायता-सङ्ख्या १०७७ (1077) स्युः सप्ताहे सप्तसु दिनेषु २४ घण्टाः सक्रियाः स्थास्यन्ति। कस्यामपि आपदायाम्, मार्ग-अवरोधे, भूस्खलने अन्यासु आपातस्थितिषु च एतासु सहायतासङ्ख्यासु सद्यः साहाय्यं प्राप्स्यते। प्राधिकरणेन पर्यटकाः स्थानीयजनाश्च ऋतु-आपदा-सम्बद्धिनीं सूचनां दृष्ट्वा एव यात्रां प्रारब्धुम् उपदिष्टाः। दिशानिर्देशे चलभाषयन्त्रेषु (मोबाइल) ऑफलाइन-मानचित्रं (ऑफलाइन नक्शा) अधोभारणं कृत्वा स्थापयितुं कथितम् अस्ति।

## एच.पी.एस.डी.एम.ए. (HPSDMA) इत्यनेन जनेभ्यः दत्तः अयम् उपदेशः

मार्गाणां सद्यःस्थितेः सूचना स्थानीयजनेभ्यः प्रशासनात् वा प्राप्तुम् अपि परामर्शः दत्तः। वाहने प्राथमिकोपचार-पेटिका (फर्स्ट एड किट), पर्याप्तं पेयजलं, आपत्कालीन-वाहन-सामग्रीं च प्रस्थापयितुं कथितम्। एतत् कस्यामपि आकस्मिकस्थित्याः सुरक्षिततरूपेण सम्मुखीकरणे साहाय्यं विधास्यति। जनैः स्वक्षेत्रेषु सम्भाव्य-सङ्कटानां पूर्वमेव परिचयं कर्तुम् आग्रहः कृतः अस्ति। अत्यधिकवृष्ट्याः, भूस्खलनस्य, मेघविस्फोटस्य (बादल फटने), भूकम्पस्य, अग्नेः, औद्योगिकदुर्घटनानां च प्रति सजगैः भवितुं निर्देशः अस्ति। प्राधिकरणानुसारं समये सतर्कता, शुद्धा सूचना, पूर्वसज्जता एव आपदाभ्यः रक्षणस्य प्रभावी उपायः वर्तते। अस्मिन्नेव उद्देश्यात् सहायतासेवाः सम्पूर्णे मानसून-ऋतौ अहोरात्रं (२४ घण्टाः) सक्रियाः स्थापिताः सन्ति।

### संवेदनशीलानां वर्गाणां सुरक्षायाम् विशेषं बलम्

दिशानिर्देशे संवेदनशीलानां वर्गाणां सुरक्षायाम् विशेषं बलं दत्तम् अस्ति। एतेषु बालकाः, वृद्धाः, गर्भिण्यः महिलाः, दिव्यांगजनाश्च सम्मिलिताः सन्ति। एतेषां सुरक्षायै पूर्वमेव स्थानान्तरणस्य (निकासी) साहाय्यस्य च योजनां सज्जं स्थापयितुं कथितम्। आपदास्थितौ एतेभ्यः प्राथमिकतायाः आधारेण सुरक्षितस्थानानि यावत् प्रापयिष्यते।

## अत्र कुर्वन्तु सम्पर्कम्

प्राधिकरणेन आपदास्थितौ भीतैः भवितुं स्थाने सद्यः एव सहायतासङ्ख्यासु सम्पर्कं कर्तुं कथितम्। राज्य-आपदा-सहायता-सङ्ख्यायां १०७० अथवा सम्बद्ध-मण्डल-आपदा-सहायता-सङ्ख्यायां १०७७ उपरि कॉल (आह्वानं) कुर्वन्तु। स्थानीयप्रशासनस्य आपदाप्रबन्धन-अधिकारिणां च निर्देशाणाम् अनुपालनं महत्त्वपूर्णं वर्तते। रक्षण-साहाय्य-प्राथमिकोपचार-सम्बद्धां सूचनां समये-समये प्राप्नुवन्तः तिष्ठन्तु।

# लौकिकन्यायकोशः काकदध्युपघातन्यायः

कश्चन मनुष्यः केनापि कार्येण बहिः गच्छति स्म अन्यः गृहस्य अन्तरेव वर्तते स्म। "गृहे वर्तमानं" दधि काकेभ्यः रक्ष्यताम्" इति तेन बहिः गच्छता अन्यः कथितः। किञ्चित्कालानन्तरं कश्चन शुनकः आगत्य सर्वमपि दधि खादितवान्। काकेभ्यः एव दधि रक्षणीयम् इति चिन्तयता तेन मन्दमतिना दधिरक्षणस्य महत्त्वं न ज्ञातम् एवम् उपलक्षणम् अज्ञात्वा ये वाच्यार्थमेव आश्रयन्ति तेषां विषये अस्य प्रयोगः क्रियते।

**डा. वर्षा प्रकाश टोणगांवकर,पुणे, महाराष्ट्रम्**



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य एका विचित्रा वार्ता मया श्रुता। अर्जन्तीना-देशे एकेन जनेन त्रयोदश श्वानः क्रीडा-कञ्चुकैः अलङ्कृताः। तैः श्वभिः क्रीडकस्य 'मेस्सी'-महोदयस्य दश-सङ्ख्याङ्किताः कञ्चुकाः धृताः। दलस्य विजयाय एषः उत्साहः प्रदर्शितः।

**काव्या-** नमस्ते नन्दिनि। क्रीडा-विषये श्वभिः ईदृशः स्नेहः प्रदर्शितः इति अतिविचित्रम्। इदानीं द्वितीय-वार्ता मया उच्यते।

अमेरिकादेशस्य कॅलिफोर्नियाप्रान्ते सः जलगजः रक्त-शैवाल-शय्यायाम् बहुकालम् सुप्तः। तेन तस्य शरीरं नीललोहित-वर्णं जातम्। तत् दृष्ट्वा जनाः भीताः जाताः। परन्तु केवलं शैवाल-रागः एव सः इति पश्चात् अत्र ज्ञातम्।

**नन्दिनी-** सत्यम्, नीललोहित-जलगजः तु सर्वैः अपूर्वः इति चिन्तितम्। इदानीं तृतीया वार्ता स्पैनदेशात् अस्ति।


तत्र माद्रिदे नगरे उत्सवदिने पुरुषैः महिलाभिश्च उन्नत- पादकटकैः युक्तैः पादत्राणैः मार्गे धावितम्। बहवः धावकाः मार्गे पतिताः जाताः, तथापि तेषां मोदः न न्यूनः जातः। एषः कश्चन उत्सवः अस्ति।

**काव्या-** कटकपादत्राणैः धावनं तु महता कष्टेन कृतम् स्यात्। इदानीं भारतदेशात् एका खेदकरी वार्ता प्राप्ता। तत्र राजमार्गे आम्रफलैः पूर्णं वाहनं विपरीतं जातम्। तदा रुग्णस्य चालकस्य साहाय्यं न कृतम् जनैः। प्रत्युत मार्गे पतितानां फलानां लुण्ठनं सर्वैः मिलित्वा कृतम्। एषः विषयः चलचित्रे मुद्रितः जातः। जनाः मन्यन्ते यत् अत्र मानवता मृता जाता।

**नन्दिनी-** एषा वार्ता तु महती खेदकरी। आम्रफलानां कृते मानवता परित्यक्ता जनैः इति निन्दनीयम्। अस्तु, अद्यतन-वार्ताः समाप्ताः। पुनर्मेलिष्यामः। धन्यवादः।

**काव्या-** धन्यवादः, नन्दिनि। पुनर्मेलिष्यामः।





हिमसंस्कृतवार्ता

असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा- ५३

पुरा महाभाग्यवत्यः व्रजगोपिकाः व्रजभूमौ आसन्। ताः अत्यन्तं सरलस्वभावयुताः, सुकोमलभावापन्नाः च आसन्। ताः शास्त्रज्ञानं, महज्ज्ञानं वा न इच्छन्ति स्म, केवलं प्रेमयुता भक्तिर्हि तासां जीवनसाधनम् आसीत्। भगवान् श्रीकृष्णः हि तासां परमः स्वामी, प्रेमी, जीवनाधारः, सर्वस्वञ्च आसीत्। तं विहाय ताः न क्वापि रमन्ते स्म। तस्योपरि तासाम् अत्यन्तं विशुद्धभक्तिः आसीत्। धन्यास्ताः व्रजनार्यः लोकदुर्लभाः।

*'वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः।*
*यासां हरिकथोद्गीतं पुनाति भुवनत्रयम्॥'*

अर्थात्, वयं गोकुलस्य व्रजाङ्गनानां चरणरेणून् वारं वारं सश्रद्धञ्च शिरसि स्थापयामः, यासां भगवत्सम्बद्धाः कथाः लोकत्रयं पवित्रीकर्तुमर्हाः सन्तीति। देवर्षिर्नारदः स्वभक्तिसूत्रेषु गोपिकानां प्रेम परमादर्शभूतं कथयति- 'यथा व्रजगोपिकानाम्॥' इति। एवं प्रकारेण सूरदासः कथयति- "गोपी प्रेमकी धुजा।" इति। ताः हरेः परमानन्दिन्यः परमाह्लादिन्यश्च शक्तयः सन्ति। ताः भगवतः भिन्नस्वरूपिण्यः नैव कदापि। उद्धवसदृशः ज्ञानी अपि तासाम् अलौकिकं प्रेम अवलोक्य अकथयत्- "आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम्"- यद्यहं वृन्दावनस्य कश्चन गुल्म-लता-वृक्षादिकः स्यां तर्हि कृतकृत्यः अभविष्यमिति। किमर्थम्? एतदर्थमेव यत् एतासां महाभाग्यवतीनां गोपिकानां परमपवित्रपादपद्मेभ्यः परागरेणवः उड्डयमानाः ममोपरि निपतन्तश्च दृश्यन्ते इति। अहो! यासां चरणरेणून् शिरसि धर्तुं ब्रह्मादिदेवाः अपि अत्यन्तं लालायिताः भवेयुः, अतः तत्सन्दर्भे किमपि लेखितुं न शक्यते, लिख्यते चेदपि तत्तु केवलं महत्यै धृष्टतायै हि भवेत्। धन्याः ताः गोपिकाः, यासां कृते प्रभुणा रासलीला रचिता, याभिः सह च प्रभुणा नृत्यं कृतं, सुमधुरस्वरेण वंशी निनादिता च। ब्रह्माण्डनायकः श्रीभगवान् एवमेव गोपिकानां निस्वार्थप्रेम्णा पूर्णतः वशीभूतः जातः। धन्याः ताः परमप्रेमस्वरूपिण्यः व्रजगोपिकाः! इति, शुभम्।